# काशीविद्यासुधानिधिः

श्रीगणेशाय नमः

श्रीमद्विजयिनीदेवीपाठशालोदयोदितः । प्राच्यप्रतीच्यवाक्पूर्वापरपक्षद्वयान्वितः ॥ १ ॥

अङ्कुरश्मिः स्फुटयतु काशीविद्यासुधानिधिः । प्राचीनार्यजनप्रज्ञाविलासकुमुदोत्करान् ॥ २ ॥

# THE PANDIT.

A Monthly Journal, of the Benares College, devoted to Sanskrit Literature.

No. 56. Benares, January 2nd, 1871. Vol. V.


## ॥ प्रकरणपञ्चिकायाम् ॥

॥ पूर्वाङ्कप्रकान्तस्याङ्गपारायणस्य शेषः, अतिदेशपारायणं च चरमम् ॥

नन्वेवं विश्वजिदादावधिकारोप्याक्षिप्ततया विधेय एव स्यात् । उच्यते । नाधिकारस्य नियोगसिद्धौ व्यापारः, किं तु कर्तृत्वस्य, यत्प्रतिपत्त्यर्थश्चाधिकाराक्षेप इति । एवं च विधिना स्वसिद्ध्यर्थमनाक्षिप्यमाणत्वान्न क्रमो विधेय इति मीमांसकानामुद्गारः । क्रमस्य पाञ्चमिकस्य न किं चिदभिधानमस्ति । न चानभिहितस्य तस्य वैनियोगिकमौपादानिकं वा शेषत्वं घटते । न वा शेषभूतस्य विधिराक्षेपाय प्रभवति । यस्तु वषट्कर्तुः प्रथमभक्ष इति प्रथमशब्दाभिधेयः क्रमः स हि विनियोज्यो विधेयश्चेति निबन्धनकारः । अत एवासौ न निलीयेतेति विततः । पञ्चमे हि यस्तावच्छ्रौतक्रमः अध्वर्युर्गृहपतिं दीक्षयित्वेत्यादौ न तस्य किं चिदभिधानमस्ति । कथं तर्हि प्रतीयते । क्त्वाप्रत्ययोपि हि समानकर्तृकेऽर्थे वर्तमानाद्धातोर्विधीयमानोपि य एव प्रथमं प्रयुज्यते तत एव विधीयते तत्र क्त्वाप्रत्ययश्रवणात् । अथ वा प्रयोज्यत्वे स्थितेऽर्थवित्तिरपि तथैव । यथाप्रयोगभावित्वादर्थावगतेर्यथावगति चानुष्ठानमिति क्रमोपि तथाविध एवावगम्यते । अर्थादिष्वभिधानशङ्का रूपवदेव । अनभिधीयमानस्याप्यवगत्युपायभावस्तत्रतत्र प्रमाणे चिन्तित एव । यदि विध्यर्थे प्रतिशेषत्वं क्रमस्य नास्ति, कथं तर्हि चोदनालक्षणत्वम् । न विधेयता चोदनालक्षणत्वे हेतुः । अधिकारस्य तदभावप्रसङ्गात् । अविध्यर्थस्तदन्वितः प्रतिपाद्येत इति चोदनालक्षणम् । तर्हि क्रमान्वितोपि प्रयोगविधिरवसीयते इति तस्यापि चोदनालक्षणत्वमविरुद्धम् । क्रमविशेषपरिगृहीतप्रयोगावच्छिन्नो हि प्रयोगविधिः प्रतीयते । अत एवानङ्गत्वेपि क्रमनियमस्य तदादरः । तदभावे प्रयोगानुपपत्तेः प्रयोगविधेश्च विशिष्टप्रयोगसाध्यत्वात् । तदेवं द्विविधमौपदेशिकत्वं वैनियोगिकमौपादानिकं च । तत्र न यथाधिकारं विनियुज्यते । अपि तु यथाविनियोगमधिकारः सामान्यतोप्यधिकाराश्रयणेन विनियोगसिद्धेः । यस्यापि प्रतिप्रकरणं व्यवस्थासिद्ध्यै ग्राहकपूर्वको विनियोगः, यद्यपि च साधिकारस्यैव ग्राहकत्वम्, तथापि सामान्यतः स्वर्गकामादावधिकारिणि लब्धे साधिकारत्वे संपन्ने ग्राहकग्रहणे निवृत्ते नियुक्तेष्वङ्गेषु तदवच्छिन्ने विध्यर्थे कार्यात्मनि तदनुष्ठानसमर्थस्य स्वर्गकामिनोधिकार इति पश्चादधिकारिविशेषनियमः । अत एवान्धबधिरपङ्ग्वादीनामवेक्षणश्रवणातिक्रमणाद्यङ्गवति पञ्चार्षेयाणामार्षेयत्रयवरणलक्षणाङ्गभाजि आहवनीयादियोगिनि चानाहिताग्नीनामनधिकारः । तेषां तथाविधविध्यर्थसंपादने स्वाभाविकशक्त्ययोगादिति स्वयमूहनीयम् । येषां च न स्वाभाविकी शक्तिरपेता तेषामधिकारो भवत्येव । अद्रव्याणामसमाधेयव्याधिविशेषपरवशेन्द्रियाणां च । ननु तेषामधिकारो न निर्वहत्येवापूर्वसिद्धिनिबन्धनत्वात्तस्य, तस्याः सकलाङ्गग्रामायत्तत्वात् । सत्यम् । कामाधिकारो न भवत्येव । तस्य सेतिकर्तव्यताकफलभावनाकरणविषयत्वात्फलकामस्य हि फलभावनां प्रति एककरणीभूते ऽधिकारो नावकल्पेत, सर्वं च करणं सेतिकर्तव्यताकं करणतामनुभवतीति संमतम् । ततः साङ्गानुष्ठाने सेतिकर्तव्यताकत्वव्याघाताद्विषयाभावाद्विषयिणोप्यनुपपत्तेरधिकारविलय एव कामिनाम् । निमित्ततश्च केवलभावार्थविषय एवाधिकार इत्यङ्गानुपसंहारेपि विषयप्रमोषा-

उपदेशोपस्थितो यो वाक्यार्थान्वयमृच्छति ।
स औपदेशिको ज्ञेयः सच द्वैधमुपस्थितः ॥ ६४ ॥

ग्रन्थेनोपस्थितश्चैव विध्यर्थोपस्थितस्तथा ।
यथोपकारः प्रकृतौ नियोज्यो वा श्रुतो यथा ॥ ६५ ॥

प्रकारोपस्थितो यश्च द्वेधा नासावुपस्थितः ।
तेनौपदेशिको नासौ केवलं कार्यबन्धनः ॥ ६६ ॥

पूर्वनिबन्धनिबन्धनमपनेतुं सम्यगीहमानेन ।
शालिकनाथेन कृतः कृतिनामानन्ददोयत्नः ॥ ६७ ॥

इति श्रीशालिकनाथमिश्रविरचितायां प्रकरणपञ्चिका-
यामतिदेशपारायणं नाम प्रकरणं संपूर्णम् ॥

॥ समाप्ता च प्रकरणपञ्चिका ॥

---

## ॥ श्रीगणेशाय नमः ॥

॥ श्रीमद्भगवत्पतञ्जलिविरचितार्याः ॥

गर्भगृहवासमंभवजन्मजरामरणविप्रयोगाब्धौ ।
जगदालोक्य निमग्नं प्राह गुरुं प्राञ्जलिः शिष्यः ॥ १ ॥

त्वं साङ्गवेदवेत्ता छेत्ता संशयगणस्य ।
त्वतं वक्ता मंसारार्णवतरणं प्रश्नं पृच्छाम्यहं भगवन् ॥ २ ॥

दीर्घे ऽस्मिन्संसारे संसरतः कस्य केन संबन्धः ।
कर्मशुभाशुभफलमनुभवति गतागतैरिह कः ॥ ३ ॥

कर्मगुणजालबद्धो जीवः संसरति कोशकारइव ।
मोहान्धकारगहनात्तस्य कथं बन्धनान्मोक्षः ॥ ४ ॥

गुणपुरुषविभागज्ञे धर्माधर्मौ बन्धकौ न भवतः ।
इति गदितं प्रकृतिं पुरुषं च मे ब्रूहि ॥ ५ ॥

क्षित्याधारो भगवान्पृष्टः शिष्येण तं स होवाच ।
विदुषामप्यतिगहनं वक्तव्यमिदं शृणु तथापि त्वम् ॥ ६ ॥

सत्यमिव जगदसत्यं मूलप्रकृतेः कृतं येन ।
तं प्रणिपत्योपेन्द्रं वक्ष्ये परमार्थसारमिदम् ॥ ७ ॥

अव्यक्तादण्डमभूदण्डाद्ब्रह्मा ततः प्रजासर्गः ।
मायामयः कल्पान्ते संह्रियते पुनः क्रमशः ॥ ८ ॥

मायामयोऽप्यचेतनो गुणकरणगणः करोति कर्माणि ।
तदधिष्ठाता देही सचेतनोपि करोति न किंचिदपि ॥ ९ ॥

यद्वदचेतनमपि सन्निकटस्थे भ्रामके भ्रमति लोहम् ।
तद्वत्करणसमूहश्चेष्टते चिदधिष्ठिते देहे ॥ १० ॥

यद्वत्सवितर्युदिते करोति कर्माणि जीवलोको ऽयम् ।
न च तानि करोति रविर्न कारयति तद्वदात्मापि ॥ ११ ॥

मनसो ऽहंकारमूर्छितस्य चैतन्यविबोधितस्येह ।
पुरुषाभिमानसुखदुःखभावना भवन्ति मूढस्य ॥ १२ ॥

कर्ता भोक्ता द्रष्टा ऽस्मि कर्मणामुत्तमादीनाम् ।
इति तत्स्वभावविमलो मन्यते सर्वगोप्यात्मा ॥ १३ ॥

नानाविधवर्णानां वर्णान्धत्ते यथा ऽमलः स्फटिकः ।
तद्वदुपाधेर्गुणतो भावितस्य भावं विभुर्धत्ते ॥ १४ ॥

गच्छतिगच्छतिसलिलेदिनकरबिम्बंस्थिते स्थितिंयाति ।
अन्तःकरणे गच्छति गच्छत्यात्मापि तद्वदिह ॥ १५ ॥

राहुरदृश्योऽपि यथा शशिबिम्बस्थः प्रकाशतामेति ।
सर्वगतो ऽपि तथात्मा बुद्धिस्थो दृश्यतामेति ॥ १६ ॥

आदर्शे मलरहिते यद्वद्रूपं विचिन्वते लोकाः ।
आलोकयति तथात्मा विशुद्धबुद्धौ स्वमात्मानम् ॥ १७ ॥

सर्वगतं निरुपममद्वैतं तच्च चेतसा गम्यम् ।
यद्बुद्धिगतं ब्रह्मोपलभ्यते शिष्य बोध्यं तत् ॥ १८ ॥

बुद्धिमनोऽहंकारास्तन्मात्रेन्द्रियगणाः सभूतगणाः ।
संसारसर्गपरिरक्षणक्षमाः प्राकृता हेयाः ॥ १९ ॥

धर्माधर्मौ सुखदुःखे कल्पना स्वर्गनरकवासश्च ।
उत्पत्तिस्थितिनिधनवर्णाश्रमा न सन्तीह परमार्थे ॥ २० ॥

मृगतृष्णायामुदकं शुक्तौ रजतं भुजंगमो रज्ज्वाम् ।
तैमिरिकचन्द्रयुगवद्भ्रान्तमखिलं जगद्रूपम् ॥ २१ ॥

यद्वद्दिनकर एको विभाति सलिलाशयेषु सर्वेषु ।
तद्वत्सकलोपाधिष्ववस्थितो भाति परमात्मा ॥ २२ ॥

खमिव घटादिष्वन्तर्बहिः स्थितं ब्रह्म सर्वेषु पिण्डेषु ।
देहे ऽहमित्यनात्मनि बुद्धिः संसारबन्धाय ॥ २३ ॥

अमलः सकृद्विभातश्चैतन्यात्मा खवद्व्यापी ।
सर्वविकल्पनहीनः शुद्धो बुद्धो ऽजरो ऽमरः शान्तः ॥ २४ ॥

रसफाणितशर्करिकागुडखण्डाद्या विकृतयो यथेक्षोः ।
तद्वदवस्थाभेदाः परमात्मन एव बहुरूपाः ॥ २५ ॥

विज्ञानान्तर्यामिप्राणविराड्देहजातिपिण्डान्ताः ।
व्यवहारस्यस्यात्मन एते ऽवस्थाविशेषाः स्युः ॥ २६ ॥

रज्ज्वां नास्ति भुजङ्गः सर्पभयं भवति हेतुना केन ।
तद्वद्द्वैतविकल्पभ्रान्तिरविद्या न सत्यमिदम् ॥ २७ ॥

एतत्तदन्धकारं यदनात्मन्यात्मताभ्रान्त्या ।
न विदन्ति वासुदेवं सर्वात्मानं नरा मूढाः ॥ २८ ॥

प्राणाद्यनन्तभेदैरात्मानं संवितत्येन्द्रजालमिव ।
उपसंहरति वासुदेवः स्वभूत्या क्रीडमानइव ॥ २९ ॥

त्रिभिरेव विश्वतैजसप्राज्ञैस्तैरादिमध्यनिधनाख्यैः ।
जाग्रत्स्वप्नसुषुप्तैर्भ्रमभूतैश्छादितं तुरीयम् ॥ ३० ॥

मोहयतीवात्मा न स्वमायया द्वैतरूपया देवम् ।
उपलभते स्वयमेव गुहायां पुरुषमात्मानम् ॥ ३१ ॥
ज्वलनाद्धूमोद्गतिभिर्विविधाऽऽकृतिरम्बरे यथा भाति ।
तद्वद्विष्णोः सृष्टिः स्वमायया द्वैतविस्तरा भाति ॥ ३२ ॥
शान्तइव मनसि शान्ते हृष्टे हृष्टइव मूढइव मूढे ।
व्यवहारस्थोपि पुनः परमार्थेन ईश्वरो भवति ॥ ३३ ॥
जलधरधूमरजोभिर्मलिनीक्रियते यथा न गगनतलम् ।
तद्वत्प्रकृतिविकारैः परामृष्टो ऽमलः पुरुषः ॥ ३४ ॥
एकस्मिन् घटगगने धूमादिमलावृते ऽशेषाः ।
न भवन्ति मलोपेता बन्धो जीवे ऽपि तद्वदिह ॥ ३५ ॥
देहेन्द्रियेषु नियताः कर्मगुणाः कुर्वते स्वभोगार्थम् ।
नाहं कर्तेति न ममेति विजानतः कर्म नैव बध्नाति ॥३६॥
अन्यशरीरेण कृतं यत्कर्म भवेद्येन देह उत्पन्नः ।
तदवश्यं भोक्तव्यं भोगादेव क्षयो ऽस्य निर्दिष्टः ॥ ३७ ॥
प्राग् ज्ञानोत्पत्तेश्चित्तं यत्कर्म ज्ञानशिखिशिखालीढम् ।
बीजमिव दहनदग्धं जन्मसमर्थं न तद् भवति ॥ ३८ ॥
यद्वदिषीकातूलं पवनबलं दश दिशो याति ।
ब्रह्मणि तत्त्वज्ञानात्तथैव कर्माणि तत्त्वविदः ॥ ३९ ॥
ज्ञानप्राप्तेरूर्ध्वं क्रियमाणं कर्म यत्तदपि नाम ।
न श्लिष्यति कर्तारं पुष्करपर्णं यथा वारि ॥ ४० ॥
वाग्देहमानसैरिह कर्म चयः क्रियतइति बुधाः प्राहुः ।
एकोपि नाहमेषां न च कर्ता कर्मणामस्मि ॥ ४१ ॥
कर्मफलबीजनाशाज्जन्मविनाशो न चात्र सन्देहः ।
बुद्धैवमपगततमाः सवितेवाभाति भारूपः ॥ ४२ ॥
क्षीरादुद्धृतमाज्यं क्षिप्तं यद्वन्न पूर्ववत्तस्मिन् ।
भवति गुणेभ्यस्तद्वत्पृथक्कृतश्चेतनोप्यात्मा ॥ ४३ ॥
गुणमयमायागहनं निर्धूय यथा तमः सहस्रांशुः ।
बाह्याभ्यन्तरचारी सैन्धवघनवद्भवेत्पुरुषः ॥ ४४ ॥
यद्वद्देहावयवा मृदेव पार्थो विकारजातयश्च ।
तद्वत्स्थावरजङ्गममद्वैतं द्वैतवद्भाति ॥ ४५ ॥
एकस्मात्क्षेत्रज्ञाद्ब्रह्मः क्षेत्रज्ञजातयो जाताः ।
लोहगतादिव दहनात्समं ततो विस्फुलिङ्गकणाः ॥ ४६ ॥
त्रैगुण्यसङ्गदोषाद्बद्धा इव धान्यजातयः स्वतुषैः ।
जन्म लभन्ते तावद्यावज्ज्ञानाग्निना ऽदग्धाः ॥ ४७ ॥
त्रिगुणा चैतन्यात्मनि सर्वगते ऽवस्थिताखिलाधारे ।
कुरुते सृष्टिमविद्या सर्वात्मा स्पृश्यते तया नात्मा ॥ ४८ ॥
रज्ज्वां भुजङ्गहेतो प्रभवविनाशौ यथा न स्तः ।
जगदुत्पत्तिविनाशे न च कारणमस्ति तद्वदिह ॥ ४९ ॥

जन्मविनाशगमनागमनविवर्जितो नित्यम् ।
आकाशमिव घटादिषु सर्वात्मा सर्वगो ऽबद्धः ॥ ५० ॥
कर्मशुभाशुभफलचयसुखदुःखैर्योगो भवत्युपाधीनाम् ।
तत्संसर्गाद्बद्धस्तस्करसङ्गादतस्करवत् ॥ ५१ ॥
देहगुणकरणगोचरसङ्गः पुरुषस्य यावदिह भवति ।
तावन्मायापाशैः संसारे बद्धवद्भवति ॥ ५२ ॥
मातृपितृपुत्रदारधनभोगविभागसुखदुःखसंमूढः ।
जन्मजरामरणमये चक्रमिव भ्राम्यते जन्तुः ॥ ५३ ॥
लोकव्यवहारकृतां य इहाविद्यामुपासते मूढाः ।
ते जननमरणधर्मिणो ऽन्धे तमसि प्रपद्यन्ते ॥ ५४ ॥
हिमफेनबुद्बुदाइव जलस्य धूमोद्गमो यथा वह्नेः ।
तद्वत्स्वभावभूता मायैषा कीर्तिता विष्णोः ॥ ५५ ॥
एनां द्वैतविकल्पभ्रमस्वरूपां विमोहिनीं मायाम् ।
उत्सृज्य सकलनिष्कलमद्वैतं भावयेद्ब्रह्म ॥ ५६ ॥
यद्वत्सलिले सलिलं क्षीरे क्षीरं समीरणे वायुः ।
तद्वद्ब्रह्मणि विमले भावनया तन्मयत्वमुपयाति ॥ ५७ ॥
को मोहः कः शोकः सर्वं ब्रह्मावलोकयतः ।
प्रारब्धान्ते साक्षाद्ब्रह्मीभूतः स्वसंवेद्यः ॥ ५८ ॥
ब्रह्मैवेदं सर्वं निष्कलमद्वैतं यदैव भातीह ।
मोहगहनाद्विमुक्तस्तदैव परमेश्वरीभूतः ॥ ५९ ॥
त्यक्तोपाधिः स्फटिकः स्वप्रभया भाति निर्मलो यद्वत् ।
चिद्व्याप्तं चैतन्यं तथा विभातीह निरुपाधि ॥ ६० ॥
गुणकरणगणशरीरप्राणतन्मात्रजातिसुखदुःखैः ।
अपरामृष्टो व्यापी चिद्रूपो ऽहं सदा विमलः ॥ ६१ ॥
द्रष्टा श्रोता घ्राता स्पर्शयिता ग्रहीता च देही ।
देहेन्द्रियविवर्जितश्च कर्ता भोक्ता ह्यकर्तासौ ॥ ६२ ॥
एकोनेकइव स्थितो ऽहमैश्वर्ययोगः स एवात्मा ।
व्याप्याकाशवदखिलं न कश्चिदप्यत्र संदेहः ॥ ६३ ॥
यद्यत्सिद्धान्तेष्वागमतर्कादिषु भ्रमन्ति रागान्धाः ।
अनुमोदामस्तत्तत्तेषां सर्वात्मवादधिया ॥ ६४ ॥
सर्वाकारो भगवानुपास्यते येन भावेन ।
तंतं भावं भूत्वा चिन्तामणिवत्तमभ्येति ॥ ६५ ॥
नारायणमात्मानं ज्ञात्वा सर्गस्थितिप्रलयहेतुम् ।
सर्वज्ञः सर्वगतः सर्वः सर्वेश्वरो भवति ॥ ६६ ॥
आत्मज्ञस्तरति शुचं यस्माद्विद्वान् बिभेति न कुतश्चित् ।
मृत्योरपि मरणभयं न भवत्यन्यतः कुतस्तस्य ॥ ६७ ॥
तथा प्रकृतिं पुरुषं विज्ञाय निरस्तकल्पनाजालः ।
आत्मारामः पुरुषः परमात्मा केवलीभवति ॥ ६८ ॥

क्षयवृद्धिवध्यघातकबन्धविमोक्षैर्विवर्जितं नित्यम् ।
परमार्थतत्त्वमेकमतोन्यदनृतं सर्वम् ॥ ६९ ॥
नलकदलीवेणुबाणा नश्यन्ति यथा पुष्पमासाद्य ।
तद्वत्स्वभावभूताः स्वभावतां प्राप्य नश्यन्ति ॥ ७० ॥
भिन्ने ऽज्ञानग्रन्थौ छिन्ने संशयगणे शुभाशुभे क्षीणे ।
दग्धे तु जन्मबीजे परमात्मानं हरिं याति ॥ ७१ ॥
बुद्ध्वा विभक्तां प्रकृतिं पुरुषः संसारमध्यगो भवति ।
मुच्यते सर्वकर्मभिरम्बुजपत्रं यथा सलिलैः ॥ ७२ ॥
मोक्षस्य नैव कश्चिद्वासो न वा गमनमन्यत्र ।
अज्ञानहृदयग्रन्थेर्भेदो यस्तं विदुर्मोक्षम् ॥ ७३ ॥
बुद्ध्वैवमसत्यमिदं विष्णोर्मायात्मकं जगद्रूपम् ।
सर्वद्वन्द्वसहिष्णुर्योगासक्तो भवेच्छान्तः ॥ ७४ ॥
त्यक्त्वा सर्वविकल्पानात्मस्थं निश्चलं मनः कृत्वा ।
दग्धेन्धन इव वह्निः सर्वस्यात्मा भवेच्छान्तः ॥ ८५ ॥
अश्नन्यद्वा तद्वा संवीतो येन केन चिच्छान्तः ।
यत्र क्व चन शायी मुच्यते सर्वभूतात्मा ॥ ७६ ॥
इति शिष्य ब्रह्म यथा ऽभिहितं परमं विधूय नानात्वम् ।
निरुपमपरमानन्दं यो वेद स तन्मयो भवति ॥ ७७ ॥
हयमेधसहस्राण्यथ कुरुते ब्रह्मघातलक्षाणि ।
परमार्थविन्न पुण्यैर्न च पापैः स्पृश्यते विमलः ॥ ७८ ॥
मदकोपहर्षमत्सरविषादभयपरुषवर्जितवाग्बुद्धिः ।
निःस्तोत्रवषट्कारो जडवद्विचरेदगाधमतिः ॥ ७९ ॥
उत्पत्तिनाशवर्जितमेकं परमार्थमुपलभ्य ।
कृतकृत्यः सफलजन्मा सर्वगतस्तिष्ठति यथेष्टम् ॥ ८० ॥
श्वपचगृहे तीर्थे वा नष्टस्मृतिः परित्यजन्देहम् ।
ज्ञानसमकालमुक्तः कैवल्यं याति हतशोकः ॥ ८१ ॥
पुण्याय तीर्थसेवा निरयाय श्वपचादनं निधनगतिः ।
पुण्यापुण्यकलङ्कस्पर्शाभावे तु किं तेन ॥ ८२ ॥
परमार्थमार्गसाधनमभ्यस्याप्राप्य योगमपि नाम ।
सुरलोकभोगभोगी मुदितमना मोदते सुचिरम् ॥ ८३ ॥
विषयेषुसार्वभौमः सर्वजनैः पूज्यते यथा राजा ।
भुवनेषु सर्वदेवैर्योगभ्रष्टस्तथा पूज्यः ॥ ८४ ॥
महता कालेन पुमान्मानुष्यं प्राप्य योगमभ्यस्य ।
प्राप्नोति दिव्यममृतं यत्तत्परं पदं विष्णोः ॥ ८५ ॥
वेदान्तशास्त्रमखिलं विलोड्य शेषस्तु जगदाधारः ।
आर्यापञ्चाशीत्या बबन्ध परमार्थसारमिदम् ॥ ८६ ॥

॥ इति श्रीमद्भगवच्छेषकृतार्यापञ्चाशीतिः समाप्ता ॥

---

महता परिश्रमेण संपाद्य संशोध्य प्रकाशितवानिदं सांख्य० बालशास्त्री।

## ॥ अथ बालभारस्य ॥

॥ पञ्चमः सर्गः ॥

सदा हृदन्तः स्फुरितस्य विष्णो-
र्विस्तारिणीभिर्द्युतिधोरणीभिः ।
रोमावलिद्वारविनिःसृताभि-
रिवासितः सत्यवतीसुतोऽव्यात् ॥ १ ॥
इतो निषिद्धोऽपि नदीजमुख्यै[1]-
र्दुर्योधनोऽधत्त धियं प्रयाणे ।
मतङ्गजस्तुङ्गनगेन्द्रशृङ्गात्
पतन् लताद्यैरपि रुध्यते किम् ॥ २ ॥
पथ्यं वचो बाल इवातुरोऽयं
क्रूरो न गृह्णाति सुयोधनो नः ।
रणे प्रवृत्ते कुरुपाण्डवानां
भूमिर्भविष्यत्यखिलापि नैषा ॥ ३ ॥
इति प्रणीतां विदुरेण वाणी-
माकर्ण्य कुन्ती कलितोरुचिन्ता ।
ततस्त्रिमार्गापुलिने दिनेश-
सूनुं दिनेशस्तुतिलीनमागात् ॥ ४ ॥
युग्मम् ।

आ पृष्ठतापादुदयन्तमर्कं
राधेयमारोपयितुं प्रवृत्तम् ।
प्रतीक्षमाणा सुतवत्सलासौ
तापार्तिताम्यत्तनुरत्र तस्थौ ॥ ५ ॥
कर्णं ह्रियान्तेऽथ पृथेत्यवोचत्
कन्यात्वजातस्तनयोऽसि मे त्वम् ।
देवः सहस्रांशुरसौ पिता ते
प्रभूतधाम्नो न पुनः प्रसूतः ॥ ६ ॥
देवेन साक्षाद्विणाप्यमुष्मि-
न्ननूदिते तद्वचने दिवोऽन्तः ।
रोमाञ्चितस्तीर्थशतानि जानन्
पदानि कर्णोऽथ ननाम मातुः ॥ ७ ॥
निजाङ्घ्रियुग्मानतमूर्ध्नि कर्णे
द्राक् प्रस्नुवाना स्तनयोः पयांसि ।

---

१ इतश्च कैश्चिद्विनिवारितोऽपि इति पा० ।